Chapter-5

# काव्यशास्त्रेषु नायक–नायिका भेद विमर्शः

# पञ्चमोऽध्यायः

SMT. HANSA MEHTA LIBRARY

# नायिका भेद विमर्श:

आलम्बनविभावत्वेन नायिकाया: रसनिरुपणे महत्वपूर्ण स्थानम् वर्तते। उक्तम् च रसमंजरीकारेण।[1] तत्ररसेषु श्रृङ्गारस्याभ्यर्हितत्वेन तदालम्बनविभावत्वेन नायक: तावन्निरुप्यते। श्रृंगाररसो ऽयम् रसानाम् राजा अत्र कविना रसेषु शृंगाररसस्य महत्वपूर्णम् स्थानम् प्रदत्तम् नायिका भेद विमर्शा: शृंगाररसस्य एव हेतुत्वात् तस्याभ्यर्हितत्वं च रसानां न्यूनाधिकत्वांशो विवादेऽपि श्रृङ्गार सर्ववादिसम्प्रतिपन्नत्वात्। भरतमुनिनाऽपि प्रथमं श्रृङ्गार एव द्रष्ट:। प्रधानतया आलम्बनविभावत्वेन श्रृंगारेआलम्ब्य रसो विभाव्यते सालम्बन विभाव: तस्य भावा: तेन नायिका तावत निरुप्यते स्माभिरिति। नियते अनयासा नायकनायिका त्रिविधा भवति[2] स्वकीया, परकीया, सामान्याचेति। या नायिका अलंकार स्क्रचंदनादि संमप्रतिपन्ना स्वामिनम् सुखयति आहलादयति सास्वकीया नायिका। या वस्त्रालंकार सक्रचंद नादि संप्रतिपन्ना परस्वामिनम् सुखयति आहलादयति च सा परकीया नायिका या नायिका वस्त्रलंकार स्रकचंदनादि संप्रति पन्ना सर्वानि जनान सुखयति आह्लादयति आनंदयति च स सर्वकीया सामान्या चेति। त्रिविधा त्रिप्रकारकम् भवति। स्वामिनो परणीते भर्तुरएव अनुकरोति तस्य विषयकानुरागीभवति स्वकीया नायिका।

**स्वकीया**

विनयार्जवादि गुणैर्युक्ता प्रतिव्रता भवति।

अस्या: नायिकाया: चेष्टा: भर्तु: शुश्रुषा, शीलसंरक्षणम्, आर्जवम्, क्षमा चेति। उदाहरणम् यथा --

गतागतकुतूहलं नयनयोरपाङ्गावधि
स्मितं कुलनतभ्रुवामधर एव विश्राम्यति।
वच: प्रियतमश्रुतेरतिथिरेव कोऽयं क्रम:
कदाचिदपि चेत्तदा मनसि केवलं भज्जति॥ 3 ॥[3]

1. रसमञ्जरी पृष्ठ क्रमांक 7
2 रसमंञ्जरी पृष्ठ क्रमांक 9
3. रसमञ्जरी पृष्ठ क्रमाक 11 श्लोक क्रमाक ॥3॥

नाटयदर्पण कारेणापि नायिकाया: भेदत्रयम् उक्तम्। तन्मते नायिका त्रिविधा भवति।

उत्तमा मध्यमा नीचा प्रकृतिर्नृस्त्रिधा।
एकैकापि त्रिधा स्व - स्वगुणनां तारतम्यत: ॥ (3)156 ॥[1]

अथ नायिका:

त्रिविधा भवन्ति।

साहित्य दर्पणकारेण अपि नायिकाया: भेदत्रयम् प्रोक्तम्।

(सूत्र 261) कार्यत: प्रोषिते पत्यावभूषा प्रोषितप्रिया ॥
[2](सूत्र 262) विप्रलब्धा ससंकेते प्रेष्य दूतीमनागते ॥ (23)176 ॥
(सूत्र 263) खण्ऽता रुवण्ऽयत्यन्यासत्या वासकमी ष्यिता।
[3](सूत्र 264) ईर्ष्याकलहनिष्क्रान्ते कलहान्तरितार्तिभाक् ॥ (24)177 ॥
(सूत्र 265) विलम्बयत्यदोषेऽपि विरहोत्कण्ठतोत्सुका।
[4](सूत्र 266) हृष्टा वासकसज्जात्मान्यलंकृतिपरैष्यति ॥ (25)178 ॥
(सूत्र 267) सुभगम्मानिनी वश्यासन्ने स्वाधीनभर्तृका।
[5](सूत्र 268) सरन्ती सारयन्ती वा रिरंसुरभिसारिका ॥ (26)179 ॥
[6](सूत्र 269) भावाद्या यौवने स्त्रीणामलङ्कारास्त्रयोङ्गजा: ।
दश स्वाभाविकाश्चैते क्रियारुपास्त्रयोदश ॥ (27)180 ॥
सति भोगे गुणा: सप्तायत्नजाश्च स्वभावजा: ।
नावश्यम्भविनोऽथैषा, विंशति: स्त्रीषु मुख्यत: ॥ (28)181 ॥

दशरुपककारेण अभिनायिकाया: भेदत्रयम् प्रतिपाद्य भेदोपभेदपुरस्सरम् नायिका भेदान्

1. नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)156 ॥ पृष्ठ क्रमाक 369
2 नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)176 ॥ पृष्ठ क्रमांक 381
3. नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)177 ॥ पृष्ठ क्रमांक 382
4. नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)178 ॥ पृष्ठ क्रमाक 383
5 नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)179 ॥ पृष्ठ क्रमांक 384
6 नाट्य दर्पणम् चतुर्थो विवेक: श्लोक ॥(3)180 ॥ पृष्ठ क्रमाक 384

निरुपितम् तत्र आद्यो आचार्य: भरतमुनि: तेनापि स्वकीया परकीया साधारण स्त्रीइति भेदत्रयम् प्रतिपाद्य पुन: प्रत्येकस्य धीराधीरत्वेन जयेष्ठा कनिष्ठात्वेन निरुपणम् कृतम् स्वकीया नायिकाया: मुग्धा मध्या प्रगल्भा इति भेदक्रमात् भेदत्रयम् भवति। तत्राङ्कुरितयौवना मुग्धा। सा चाज्ञातयौवना ज्ञात यौवना इति भेदक्रमेण मुग्धा । ज्ञात यौवना अज्ञात यौवना पुन: मध्यअज्ञात यौवना मध्याज्ञात यौवना पश्चात प्रगल्भा ज्ञात यौवना चेति स्वकीया नायिका षड्विधा भवति। सा एव नायिका क्रमसा लज्जा भय पराधीना रतिर्नवोढा संयोजकक्रमशा सप्तश्रया विश्रब्धनवोढा भवति अस्या: चेष्टा अतिमतोहरा कोपेमार्जवम् नवभूषणे समीहा च ।

[1] तत्र अज्ञातयौवना यथा —

नीरातीरमुपागता श्रवणयो: सीन्ति स्फुरन्नेत्रयो:,
श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यास्यति।
शैवालाङ्कुरशङ्कया शशिमुखी रोमावलीं प्रोञ्छाति
श्रान्तास्मीतिमुहु: सखीमविदितश्रोणीभरा पृच्छति॥ 5 ॥

[2] ज्ञातयौवना यथा —

स्वयम्भू: शम्भुरम्भोजलोचने त्वत्पयोधर:।
नखेन कस्यं धन्यस्य चन्द्रचुडो भविष्यति॥ 6 ॥

[3] नवोढा यथा —

हस्ते धृतापि शयने विनिवेशितापि
क्रोडे कृतापि यतते बहिरेव गन्तुम्।

1. रसमंञ्जरी श्लोक क्रमांक ॥ 5 ॥ पृष्ठ क्रमांक 21
2. रसमंञ्जरी श्लोक क्रमांक ॥ 6 ॥ पृष्ठ क्रमांक 22
3. रसमंञ्जरी श्लोक क्रमांक ॥ 7 ॥ पृष्ठ क्रमांक 25

जानीमहे नववधूरिह तस्य वश्या
य: पारदं स्थिरयितुं क्षमते करेण ॥ 7 ॥

[1] विश्रब्धनवोढा यथा —

दशमुकुलितनेत्रपालि नीवीनियमितबाहु कृतोरुयुग्मबन्धम्।
करकलितकुचस्थलं नवोढा स्वपिति समीपमेत्य कस्य यून: ॥8॥

पतिमात्रविषयककेलिकलापकोविदा प्रगल्भा। वेश्यायां कुलटायां च पतिमात्रविषयत्वाभावा-
न्नतिव्याप्ति:।

अस्यास्तु चेष्टा रतिप्रीति:। आनन्दात्सम्मोह:।

रसमंजरीकारमते समानलज्जामदना मध्या नायिका। एषाअपि नवोढा भेदेन द्विप्रकारम् भवति अस्याचेष्टा: धैर्ये वक्रोक्ति:, अधैर्ये च परुषावाक्। उदाहरति मुग्धा मध्या नायिका अपेक्षया प्रग्ल्भानायिका अतीव कामकलाकलाप निपुणा भवति। उक्तम् च रसमञ्जरी कारेण प्रति मात्र विषयक केलिकलापफोविदा प्रगल्भा अस्या: चेष्टा रतिप्रति: आनन्द संमोहाश्च।

प्रथमा यथा —

[1] संस्पृश्य स्तनमाकलप्य वदनं संश्लिष्य कण्ठस्थलं
निष्पीडयाघरविम्बमम्बरमपाकृष्य व्युदस्यालकम्।
देवस्याम्बुजिनीपते: समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाञ्चलै: श्रवणयोर्नीलोत्पलं निह्नुते ॥10॥

द्वितीया यथा —

1. रसमञ्जरी श्लोक क्रमाक ॥ 8 ॥ पृष्ठ क्रमाक 26
२. रसमंजरी श्लोक क्रमांक ॥10॥ पृष्ठ क्रमांक 34

[1] नखक्षतमुर:स्थलेऽघरदले रदस्य व्रणं
च्युता वकुलमालिका विगलिता च मुन्तावलिः।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च रतिः क्व च तवालि शिक्षाविधिः ॥11॥

मध्याप्रगल्भे प्रत्येकं मानावस्थायां त्रिविधे...धीरा, अधीरा, धीराधीरा चेति। तत्र व्यङ्ग्यकोपप्रकाशा धीरा, अव्यङ्ग्यकोपप्रकाशाऽधीरा, व्यङ्ग्याव्यङ्ग्यकोप्रकाशा धीराधीरा। इयांस्तु विशेषः - मध्याधीरायाः कोपस्य गीर्व्यञ्जिका। अधीरायास्तु परुषावाक्। धीराधीराया वचनरुदिते प्रकाशके। प्रौढाधीरायास्तु रतौदासीन्यम्। अधीराया स्तर्जनताडनादि। धीराधीराया रतौदासीन्यं तर्जनादि च । इते च धीरादिभेदाः स्वीयाया एव न परकीया। इति प्राचीनलेखनमाज्ञापनमात्रम् । धीरत्वमधीरत्वं तदुभ्यत्वं वा माननियतम् । परकीयायां मानश्चेतेषामावश्यकत्वात्। मानश्च न परकीयायामिति वक्तुमरशश्क्यत्वात्।

उक्तम् च साहित्य दर्पणकारेण च तेषां नायिका धीराअधीराभेदेन षद्विधाभवति। मध्याअधीरा तथा प्रगल्भाधीरा प्रगल्भाअधीरा

तथा मध्याधीरा यथा —

[2]लोलालिपुञ्जे व्रजतो निकुञ्जे
स्फाराः बभूवुः श्रमवारिधाराः ।
देहे समीहे भवतो विधातुं
धीरं समीरंनलिनीदलेन ॥ 12 ॥

मध्याऽधीरा यथा —

1. रसमंञ्जरी श्लोक क्रमांक ॥11॥ पृष्ठ क्रमांक 37
2. रसमंञ्जरी श्लोक क्रमांक ॥12॥ पृष्ठ क्रमाक 44

[1]जातस्ते निशि जागरो मम पुनर्नेत्राम्बुजे शोणिमा
निष्पीतं भवता मधु प्रविततं व्याघूर्णितं मे मनः ।
भ्राम्यदभृङ्गधने निकुञ्जभवने लब्धं त्वया श्रीफलं
पञ्चेषुः पुनरेष मां बहुतरं कूरैः शरैः कृन्तति ।।13।।

मध्या धीराधीरा यथा —

[2]कान्तानुरागचतुरोऽसि मनोहरोऽसि
नाथोऽसि किंच नवयौवनभूषितोऽसि ।
इत्यं निगद्य सदृशा वदने प्रियस्य
निःश्वस्य वाष्यलुलिता निहिता दृगन्ताः ।।14।।

प्रौढा धीरा यथा —

[3]नो बल्पं भजसे न जल्पसि सुधाधारानुकारा गिरो
दृक्पातं कुरुषे न वा परिजने कोपप्रकाशच्छलात् ।
इत्यं केतकगर्भगौरि दयिते कोपस्य सङ्गोपनम्
स्यादेवं न कथं हि ते सहचरी कुर्वीत साचि स्मितम् ।।15।।

प्रौढा अधीरा यथा —

[4] प्रतिफलमवलोक्य स्वीयमिन्दोः कलायां
हरशिरसि परस्यावासमाशङ्कमाना ।
गिरिशमचलकन्या तर्जयामास कम्प -
प्रचलवलयचञ्चत्कान्तिभाजा करेण ।।16।।

1. रसमंञ्जरी श्लोक क्रमाक ।।13।। पृष्ठ क्रमाक 46
2. रसमंञ्जरी श्लोक क्रमांक ।।14।। पृष्ठ क्रमाक 48 - 49
3. रसमंञ्जरी श्लोक क्रमांक ।।15।। पृष्ठ क्रमांक 50 - 51
4. रसमंञ्जरी श्लोक क्रमांक ।।16।। पृष्ठ क्रमांक 53

प्रौढा धीराधीरा यथा —

[1] तल्पोपान्तमुपेयुषि प्रियतमे वक्रीकृतग्रीवया
काकुव्याकुलवाचि साचि हसितस्फूर्जत्कपोलश्रिया।
हस्त्यन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालित-
प्रौष्ठीपृष्ठमयूखमांसलरुचो विस्फारिता दृष्टय: ।।17।।

एता: नायिका मुग्धा, मध्या प्रगल्लभेति क्रमशा: धीरा अधीरा धीराधीरा भेदेन भवन्ति। एता: षङ भेदा: अपि पुन: जयेष्ठा कनिष्ठादि भेदेन द्विप्रकारकम् भवति धीराजयेष्ठा धीराकनिष्ठा च । विवाह अनन्तरं भर्तुरधिकस्नेहा जयेष्ठा भर्तुर्न्यूनस्नेहा कनिष्ठा चेति।

अधिकस्नेहासु न्यूनस्नेहासु सामान्यवनितासु अपि भवन्ति।

धीरा ज्येष्ठा कनिष्ठा च यथा —

[2] एकस्मिन शयने सरोरुहदृशोर्विज्ञाय निद्रां तयो-
रेकां पल्लविताबगुण्ठनपटामुत्कन्धरो दृष्टवान्।
अन्यस्या: सनिधं समेत्य निमृतव्यालोलहस्तागुलि
व्यापारैर्वसनाञ्चलं चपलयन् स्वापच्युतिं क्लृप्तवान् ।।18।।

अधीरा ज्येष्ठा कनिष्ठा च यथा —

[3] अन्त:कोपकषायिते प्रियतमे पश्यन् धने कानने
पुष्पस्यावचयाय नम्रवदनामेकां समायोजायत्।
अर्धोन्नीलितलोचनाञ्चलचमत्काराभिरामाननां
स्मेरार्द्राधरपल्लवां नववधूमन्यां समालिङ्गति ।।19।।

1. रसमंञ्जरी श्लोक क्रमांक ।।17।। पृष्ठ क्रमाक 54 - 55
2. रसमंञ्जरी श्लोक क्रमांक ।।18।। पृष्ठ क्रमांक 58 - 59
3. रसमंञ्जरी श्लोक क्रमांक ।।19।। पृष्ठ क्रमांक 60 - 61

धीराअधीरा इत्युक्ते धैर्ये च अधैर्ये च तयो: परिग्रहौ परिगृहीतौ ययोस्ते धैर्याधैर्यपरिग्रहे । ते च ते धीराधारा ज्येष्ठा कनिष्ठा च यथा —

[1] धैर्याधैर्यपरिग्रहग्रहिलयोरेणीदृशो: प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्तवान ।
एकस्या: कलयन् करे प्रथमतो रत्नं परस्या: प्रियो
हस्ताहस्तिमिषात् स्पृशन्कुचतटीमानविन्दति ।।20।।

तत्र परकीया नायिका अप्रकटपरपुरुषानुरागा भवति । रसमञ्जरी कारेण तस्य द्विविधा

प्रोक्तम् । परोढा कन्यका च कन्याया: वित्राद्यधीनतया परकीयात्वम् प्रोच्यते । अस्या: चेष्टा: सदैव गुप्तैव भवति । इयम् सर्वैयेसह गोपयति केचिद् उक्तम् परकीया वितमात्रम् समालोक्य रागं दर्शयिति । केषांचितमते वितमात्रानुपाधिक परपुरुषानुराग वत्वं परकीयात्वम् । केचिद् उक्तम् एतेन वितमात्रानुपादिक पर पुरुषानुरागत्वम् परकीयात्वम् तेन वृत्तामात्रानुं उपाधिक प्रकट परपुरुषानुरागाया: कोअन्तर्भावा: ।

परोढा यथा —

[2] अयं रेवाकुञ्ज: कुसुमशरसेवासमुचित:
समीरोडयं वेलावनविदलदेलापरिमल: ।
इयं प्रावृड् धन्या नवजलदविन्यासरुचिरा
पराधीनं चेत: सखि किमपि कर्तुं मृगयते ।।21।।

वस्तुत: कन्याया: पित्राद्यधीवनतया परकीयत्वम् अस्य एव गुप्ताइव सर्वा चेष्टा । परकीया परोढा कन्यका भेदेन द्विप्रकारकम् भवति । एता: नायिका: पुन: गुप्ता लक्षिता विदग्धा

1. रसमञ्जरी श्लोक क्रमाक ।।20।। पृष्ठ क्रमांक 62 - 63
2. रसमंञ्जरी श्लोक क्रमांक ।।21।। पृष्ठ क्रमांक 69

कुलटा अनुशयना मुदिता प्रभृतिनाम् परकीयामेवान्तर्भाव: ।

तन्मते गुप्तापि त्रिविधा भवति । वृत्तसुरतगोपना, वर्तिष्यमाण सुरतगोपना वृत्तवर्तिष्यमाणसुरत गोपना च ।

त्रिविधापि सा यथा —

[1] श्वश्रू: क्रुध्यतु विद्विषन्तु सुहृदो निन्दन्तु वा यातर:
तस्मिन् किन्तु न मन्दिरे सखि पुन: स्वापो विधेयो मया।
आखोराक्रमणाय कोणकुहरादुत्फालकातन्वती
मार्जारी नखरै: खरै: कृतवती कां कां न मे दुर्दशाम् ।।22 ।।

विदग्धा च द्विविधा क्रियादिदग्धा वाग्विदग्धा च ।

वाग्विदग्धा यथा —

[2] निविडतमतमालवलिलवल्ली
विचकिलराजिविराजिविराजितोपकण्ढे।
पथिक समुचितस्तवाद्या तीव्रे
सवितरि तत्र सरितटे निवास: ।।23।।

वाक्विदग्धा अतीव वाक्चतुरा भवति। वाणी कौशलेन वाक्छटा माध्यमेन स्वकार्यम् संपादयति। क्रियाविदग्धा कार्य संपादने अतीवनिपुणा भवति। लक्षिताक्ष्म साधयति लक्षता प्रकटित् परपुरुषा अनुरागम् उदाहरति।

1. रसमंञ्जरी श्लोक क्रमांक ।।22।। पृष्ठ क्रमांक 72 - 73
2. रसमञ्जरी श्लोक क्रमांक ।।23।। पृष्ठ क्रमांक 75 - 76

क्रियाविदग्धा यथा —

[1]दासाय भवननाथे बदरीमपनेमातुमदिशति।
हेमन्ते हरिणाक्षी पयसि कुढारं विनिक्षिपति ।।24।।

लक्षिता यथा —

[2]यद्भूतं तद्भूतं यद्भूयात्तदपि वा भूयात्।
यद् भवति तद् भवति वा विफलस्तवकोऽपि गोपनायासा: ।।25।।

कुलटा यथा —

[3]एते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधरा:
शैला: शाद्वलमुद्वन्ति न सृजन्त्येते पुनर्नायकान्।
त्रैलोक्ये तरव: फलानि सुवते नैवारभन्ते जनान्
धात: कातरमालपामि कुलटाहेतोस्त्वया किं कृतम् ।।26।।

कुलटा नायिका व्यभिचारीणी भवति। सर्वत्र परपुरुषं एव पश्यति। अनुशयना वर्तमानस्थानविघटनेन भाविस्थानाभावशङ्कया स्वानधिष्ढितं सङ्केतस्थलं प्रति भर्तुरागमनानागमनेन एव पश्यति।

[4] समुपागवति चैत्रे निपतितपत्रे लवङ्गलतिकाया:।
सुदृश: कपोलपाली हर हर तालीदलयुतिं लेभे ।। 27 ।।

---

1. रसमञ्जरी श्लोक क्रमाक ।।24।। पृष्ठ क्रमाक 77
2. रसमञ्जरी श्लोक क्रमाक ।।25।। पृष्ठ क्रमाक 78
3. रसमञ्जरी श्लोक क्रमांक ।।26।। पृष्ठ क्रमांक 79
4 रसमंञ्जरी श्लोक क्रमाक ।।27।। पृष्ठ क्रमांक 81

[1] निद्रालुकोकिमिथुनानि कपोतपोत -
व्याधूतनूतनसरोरुहपल्लवानि ।
तत्रापि तन्वि न वनानि कियन्ति सन्ति
खिद्यस्व न प्रियतमस्य गृहं प्रयाहि ॥ 28 ॥

[2] कर्णकल्पितरसालमञ्जरीपिञ्जरीकृतकपोलमण्डल: ।
निष्पन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥ 29॥

मुदिता पति: गोष्ठेषु तिष्ठति ननान्दा अस्ति। स्वश्रु नेत्रविहीनाअस्ति एवम् श्रुत्वा अतीव मोदम् अनुभवति।

मुदिता यथा —

[3] गोष्ठेषु तिष्ठति पतिर्वधिरा ननान्द।
नेत्रद्वयस्य च न पाटवमस्ति यातु: ॥
इत्यं निशम्य तरुणीकुचकुम्भसीम्नि
रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥ 30 ॥

कन्यका यथा —

[4] किंचित्कुञ्चितहारयष्टि सरलभ्रूवल्लि साचिस्मितं
प्रान्तभ्रान्तविलोचनद्युतिभुजापर्यस्तकर्णोत्पलम् ।
अङ्गुल्या स्फुरदङ्गुलीयकरुचा कर्णस्य कण्डूयनम्
कुर्वाणा नृपकन्यका सुकृतिनं सव्याजमालोकते ॥ 31 ॥

1. रसमञ्जरी श्लोक क्रमांक ॥28॥ पृष्ठ क्रमाक 83
2. रसमंञ्जरी श्लोक क्रमांक ॥29॥ पृष्ठ क्रमांक 84
3. रसमंञ्जरी श्लोक क्रमाक ॥30॥ पृष्ठ क्रमांक 85 - 86
4 रसमंञ्जरी श्लोक क्रमाक ॥31॥ पृष्ठ क्रमाक 87 - 88

कन्याकाया: परकीयाम् एव अंतरभावा।

सामान्यवनिता नायिका वित्तामात्रम् समालोक्य बर्हिरागन प्रदर्शयति। सामान्य वनिताअपि क्वापि सत्यानुरागिणी भवति। रक्तायाम् वा विरक्तायामवा रतम् अस्या: दुर्लभम् भवति। एता: नायिका: अन्यसम्भोगदु:खिता - वक्रोक्तिगर्विता - मानवत्यश्चेति तिस्त्रो भवन्ति। दृष्टवा दर्शयति व्रीडां सम्मुखं नैवपश्यति व्याजेन कुंतल समब्यान संयम् व्यपदेशता: बाहुमूलम् स्तनौ नाभिपञ्कंजम् दर्शयेत स्फुटम्। वक्रोतिगर्विता अपि द्विविधा भवति प्रेमगर्विता सौन्दर्यगर्विता च ।

वित्तमात्रोपाधिकसमपुरुषानुरागा सामान्यवनिता।

नन्वग्निमित्रे क्षितिपतावनुरक्तायामैरावत्यामव्याप्ति:, वित्तमात्रोपाधेरभावात्, इतिचेत्। सापि काश्मीरहीरा दिदातरिमहाराजेऽनु रक्ता न तु महर्षौ । तना वगम्यते तत्रापि क्तिमात्रो पाधिरिति।

सामान्यवनिता यथा —

[1]दृष्टवा प्राङ्गणसन्निधौ बहुधनं दातारमभ्यावतं
वक्षोजौ तनुत: परस्परमिवाश्लेषं कुरङ्गीदृश:।
आनन्दाश्रुपयोसि मुञ्चति मुहुर्मालाभिषात्कुन्तलो
दृष्टि: किं च धनागमं कथयितुं कर्णान्तिकं गच्छति।। 32।।

अन्यसम्भोगदु:खिता यथा —

[2]त्वंदूति निरगा: कुञ्जंन तु प्तयीयसो गृहम्।
किंशुकाभरणो देहो दृश्यते कथमन्यथा ।। 33।।

1. रसमंञ्जरी श्लोक क्रमाक ।।32।। पृष्ठ क्रमांक 92

2 रसमञ्जरी श्लोक क्रमाक ।।33।। पृष्ठ क्रमाक 96

[1]वपुषि तव तनोति रत्नभूषां

प्रभुरिति धन्यतमासि किं ब्रवीमि।

सखि तनुनयनान्तरालभीरुः

कलयति मे न विभूशणानि कान्तः ।। 34 ।।

सौन्दर्यगर्विता यथा —

[2]कलयति कमलोपमानमक्ष्णोः

प्रथयति वाचि सुधारस्य साम्यम्।

सखि कथय किमाचरामि कान्ते

समजानि तत्र सहिष्णुतैव दोषः ।। 35 ।।

प्रियापराधसूचिक। चेष्टा मानः। स च लधुर्मध्योगुरुश्च अल्यापनेयो लधुः। कष्टतरापनेयो मध्यमः। कष्टमापनेयो गुरुः। असाध्यस्तु रसाभासः । अपरस्त्रीदर्शनादिजन्म लधुः। गोत्रस्खलनादिजन्मा मध्यमः। अपरस्त्रीसङ्गजन्मा गुरुः। अन्यथासिद्धकुतूलाद्यपनेयो लधुः। अन्यथावादशपथाद्यपनेयो मध्यमः। चरणपातभूषणाद्यपनेयो गुरुः।

लधुर्यथा —

[3]स्वेदाम्बुभिः क्वचन पिच्छिलमङ्गमते -

च्छातोदरि क्वचन कण्टकितं चकास्ति।

अन्यां विलोक्यति भूषयति प्रियेऽपि

मानः क्व दास्यति पदं तव तन्न विह्मः ।। 36 ।।

1. रसमंञ्जरी श्लोक क्रमांक ।।34।। पृष्ठ क्रमांक 97
2. रसमंञ्जरी श्लोक क्रमांक ।।35।। पृष्ठ क्रमाक 99
3. रसमंञ्जरी श्लोक क्रमाक ।।36।। पृष्ठ क्रमांक 105

मध्यमो यथा —

[1] यद् गोत्रस्खलनं तत्र भ्रमो यदि न मन्यते।
रमो लिव्या लसंस्पर्शशपथं तन्वि कारय॥ ३७॥

गुरुर्यथा —

[2] दयितस्य निरीक्ष्य भालदेशं चरणालक्तकपिञ्जरं सपत्न्याः।
सुदृशो नयनस्य कोणभासा श्रुतिमुक्ताः शिखरोपमा बभूवः ॥38॥

एताः षोडशाप्यष्टभिरवस्थाभिः प्रत्येकमष्टविद्याः भवति प्रोषितभर्तृका खण्डिता कलहान्तरिता, विप्रलब्धा, उत्का, वासकसज्जा, स्वाधीनपतिका, अभिसारिका चेति एताः अष्टनायिकापि गणनादष्टविंशत्यधिकं शतं भवति। तासामप्युत्तमध्यमाधमगणनया चतुरधिकाशीतधिकं शतत्रयं भेदा भवन्ति। मध्याप्रगल्भयोः प्रत्येकं धीरा अधीरा धीराधीरेति षट् प्रभेदाः भवन्ति तेऽपि ज्येष्ठा कनिष्ठा भेदेन द्वादश भेदाः सङ्कलनया त्रंयोदश स्वीयाभेदाः। परकीया परोढा कन्यका चेति द्विविधा। सामान्य त्वे विधेति मिलित्वा षोडशेति भावः। तार च वक्ष्यमाण प्रकारेणाष्टविद्या इत्यष्टाविंशत्यधिकं शतम् भवति। तासामप्युत्ततममध्यमाधम भेदेन त्रैविध्ये शतत्रयं चतुरशीतिश्च भेदाः भवन्ति। तदुक्तं च रसमञ्जर्याम् —

त्रयोदशविद्या स्वीया द्विविधा च पराङ्गना।
एका वश्या पुनश्चाष्टाववस्थाभेदतो मताः॥

पुनस्तास्त्रिविद्याः सर्वाउत्तममध्यमाः।
इत्यं शतत्रयं तासामशीतिश्चतुरुत्तरा॥

1. रसमंञ्जरी श्लोक क्रमांक ॥37॥ पृष्ठ क्रमांक 106
2. रसमंञ्जरी श्लोक क्रमांक ॥38॥ पृष्ठ क्रमांक 108

जातिकालवयोऽवस्था भावकन्दर्पणनायकैः।
इतरा आप्यसङ्ख्याता नोक्ता विस्तरभीतितः॥

अष्टभेदानाह —— प्रषितेति । तथा च भगवान् भरतः -

तत्र वासकसज्जा च विरहोत्कण्ठितापि वा ।
स्वाधीतभर्तृका वापि कलहान्तरितापि वा॥

खण्डिता विप्रलब्धा वा तथा प्रोषितभर्तृका।
तथाभिसारिका चैव इत्याष्टौ नायिकाः स्मृताः॥

स्वाधीनपतिका चैव तथा वासकसज्जिका।
विरहोत्कण्ठिता चैव विप्रलब्धा च खण्डिता॥

कलहन्तरिता चैव तथा प्रोषितभर्तृका।
तथा भिसारिका चैति क्रमाल्लक्षणमुच्चते॥

स्वाधीनभर्तृका तद्वत्खण्डिताथाभिसारिका।
कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका॥

अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता तथा।

अथ नायिकानामवस्थाभेदेन प्रकारान्तरं निरुपयति - एता इति। एताः स्वीया - परकीया - सामान्येत्यर्थः। षोडशापि त्रयोदशविद्या स्वीया, द्विविधा परकीया सामान्या चैकविधेति संभूय षोडशविद्या भवति । अष्टभिः वक्ष्यमाभिः अवस्थाभिः दशाभिः प्रत्येकं षोडश भेदेष्वेकैकमष्टविद्याः भवन्तीति शेषः। ताशचिति अष्टावस्था इत्यर्थः। प्रोषितभर्तृका प्रोषितः

देशान्तरं गत: भर्ता यस्या: सा। खण्डिता स्वाधीनपतिकत्वाभिमानं खण्डितं यस्या:। कलहन्तरिता कलहात् प्रियेण विग्रहकारणाद् अन्तरिता दूरीभूतेति यावत् । विप्रलब्धा पञ्चितेत्यर्थ:। उत्का सङ्गमोत्कण्ठावती। वासकसज्जा वासके नायकागमनाय निश्चिते वारे ''भरताधैरभिदवे स्त्रीणां वारस्तु वासक:' इति शिङ्गभूपाल:। सज्जतेऽलङ्कृता तिष्ठतीति सा । स्वाधीनपतिका स्वस्या अधीन: वशीभूत भाव:। इति गणनादष्टाविंशत्यधिकं शतं भवति। पूर्वोक्तानां षोडशानां प्रत्येकमष्टविधत्वादिति भाव:। तासामपि आष्टाविंशत्युत्तरशतानामित्यर्थ:। उत्तममध्यमाधमगणनया प्रत्येकं त्रिविधतया तत्त्रिगुणितभेदा: भवन्ति।

यत्तु........ ''एतासां दिव्यादिव्योभयगणनया द्विपञ्चाशदधिकशतयुतं सहस्त्रं भेदा भवन्ति। दिव्या इन्द्राण्यादय: अदिव्या मालत्यादय:, दिव्यादिव्या: सीतादया:'' इति। तन्न, तदवस्थाभेदेनैव नायिकानां भेदात् । जातिभेदेन भेदस्वीकारे नायकानामप्ये वमानन्त्यं स्यात् । तथा च दिव्यादिव्याभिदा नायकानामपि सम्भवन्ति। इन्द्रादयो दिव्या: अदिव्या माधवादय:, दिव्यादिव्या: कृष्णादयइति त्रितयमपि।

यधपि मुग्धाया यथा धीरादिभेदाभावस्तथाविप्रज्ञा सामग्रयभावा तथाष्टविधात्वाभावोऽपि भवितुमर्हति। तथापि प्राचिनलेखनोनुरोधेन नवोढामालम्व्यैते भेदा अवगन्तव्या:।

तत्र दीशान्तरगते प्रयसि सन्तापव्याकुला प्रेषितभर्तृका उत्काकलहान्तरिनाविप्रलब्धानां पतिर्देशान्तरे भवतीति न तत्रातिव्याप्ति:। अस्याश्चेष्टा दशावस्था:॥

मुग्धा प्रोषितभर्तृका यथा —

[1]दु:खं दीर्घतरं वहन्त्यपि सखीवर्गीय नो भाषते
शैवालैश्शयनं सृजन्त्यपि पुनश्शेते न वा लज्जया।

1 रसमंञ्जरी श्लोक क्रमांक ॥39॥ पृष्ठ क्रमांक 116

कण्ठे गद्गदवाचमञ्चति दृशा धत्ते न वाष्योदकम्
सन्तापं सहते यदम्बुजमुखी तद्वेद चेतोभवः ।। 39 ।।

मुग्धा प्रोषितभर्तृका यथा —

[1]वासस्तदेव वपुषो वलयं तदेव
हस्तस्य सैव जधनस्थल रत्नकाञ्ची ।।
वाचालभृङ्गसुभगे सुरभौ समस्त -
मद्याधिकं भवति ते सखि किं निदानम् ।। 40।।

प्रौढा प्रोषितभर्तृका यथा —

[2]माला बालाम्बुजदलमयी मौक्तिकी हारयष्टिः
काञ्ची किञ्चत्वयि यदपते प्रस्थिते प्रस्थितैव ।
अन्यद् ब्रूमः किमिह धननी विद्यते वा न वेति
ज्ञातुं बाहोरहह वलयं पाणिमूलं प्रयाति ।। 41 ।।

परकीया प्रोषितभर्तृका यथा —

[3]श्वश्रुः पद्मयकं ददाति तदापि भ्रूसंज्ञया गृहयते
सद्यो मर्मरशङ्कया न च तया संस्पृश्यते पाणिता ।
यातुर्वाचि सुहृद्गणस्य वचसि प्रत्युत्तरं दीयते
श्वासः किन्तु न मुच्यते हतवहक्रूरः कुरङ्गीदृशा ।। 42 ।।

---

1. रसमंञ्जरी श्लोक क्रमांक ।।40।। पृष्ठ क्रमांक 117
2. रसमंञ्जरी श्लोक क्रमांक ।।41।। पृष्ठ क्रमांक 119
3. रसमंञ्जरी श्लोक क्रमाक ।।42।। पृष्ठ क्रमांक 120

सामान्यवनिता प्रोषितभर्तृका यथा —

[1]विरहविदिमन्त: प्रेम विज्ञाय कान्त:
पुनरपि वसु तस्मादेत्य मे दास्यतीति ।
मरिचनिचयमक्ष्णोर्न्यस्य वाष्पोदबिन्दून्
विसृचति पुरयोषिद् द्वारदेशोपविष्टा ॥ 43 ॥

अन्योपभोगचिहिन्त: प्रातरागच्छति पतिर्यस्या: सा खण्डिता । प्रातरित्युपलक्षणम् । अस्याश्चेष्टा: - अस्फुटालपिचिन्तानि:श्वासतूष्णीम्भावाश्रुपातादय: ॥

मुग्धा खण्डिता यथा —

[2]वक्ष: किमु कलशाङ्कितमिति किमपि द्रष्टुमिच्छन्त्या: ।
नयनं नवोढसुदृश: प्रोणेश: पाणिना पिदधे ॥ 44 ॥

मध्या खण्डिता यथा —

[3]वक्षोजचिह्नितमुरो दयितस्य वीक्ष्य ।
दीर्घं न नि:शसिति जल्पति नैव कञ्चिद् ॥
प्रातर्जलेन वदनं परिमार्जयन्ती ।
बाला विलोचनजलानि तिरोदधाति ॥ 45 ॥

प्रोढा खण्डिता यथा —

1. रसमञ्जरी श्लोक क्रमांक ॥43॥ पृष्ठ क्रमाक 122
2. रसमञ्जरी श्लोक क्रमाक ॥44॥ पृष्ठ क्रमांक 124
3. रसमंञ्जरी श्लोक क्रमाक ॥45॥ पृष्ठ क्रमाक 125-126

[1]मामुद्वीक्ष्य विपक्षपक्ष्मलदृशः पादाम्बुजालक्तकै।
शलिप्ताननमानतीकृतमुखी चित्रार्पितेवाभवत्।
रुक्षं नोक्तवती न वा कृतवति निश्वासकोष्णे दृशौ
प्रातर्मङ्गलमङ्गनाकरतलादादर्शमादर्शयत् ॥ 46 ॥

परकीया खण्डिता यथा —

[2]कान्तं निरीक्ष्य वलयाङ्कितकण्ठदेश।
मुक्तास्तया परकीया पुरुषा न वाचः ॥
दूतीमुखे मृगदृशा स्वखलदम्बुपूरा।
दूरात्परं रुरुधिरे नयनान्तपाताः ॥ 47॥

सामान्यवनिता खण्डिता यथा —

[3]उरस्तव पयोधराङ्कितमिदं कुतो मे क्षमा।
ततो वसु निधीयतां मयि पुरा यदङ्गीकृतम् ॥
इति प्रचलचेतसः प्रियतमस्य वारस्त्रिय।
क्वणत्कनककङ्कणं करतलात् समाकृष्यते ॥ 48 ॥

पतिमवमत्य पश्चात्परितप्ता कलहान्तरिता। अस्या श्चेष्टा भ्रान्तिसन्तापसम्मोह-निःश्वासप्रलापादयः।

मुग्धा कलहान्तरिता यथा —

---

2. रसमंञ्जरी श्लोक क्रमाक ॥46॥ पृष्ठ क्रमाक 127
3. रसमंञ्जरी श्लोक क्रमांक ॥47॥ पृष्ठ क्रमांक 128
4. रसमञ्जरी श्लोक क्रमाक ॥48॥ पृष्ठ क्रमाक 129

[1]अनुनयति पतिं न लज्जमाना ।
कथयति नापि सखीजनाय किञ्चित् ॥
प्रचरति मलयानिले नवोढा ।
वहति परन्तु चिराय शून्यमन्तः ॥ 49 ॥

मध्या कलहान्तरिता यथा —

[2]विरमति कथनं विना न खेदः
सति कथने समुपैति कापि लज्जा ।
इति कलहमधोमुखी सखीभ्यो
लपितुमनालपितुं च नाचकाङ्क्ष ॥ 50 ॥

प्रौढा कलहान्तरिता यथा —

[3]अकरोः किमु नेत्र शोणिमानं किमकार्षीः करपद्मतर्जनं वा ॥
कलहं किमधाः क्रुधा रसज्ञे हितमर्थं न विदन्ति दैव दृष्टाः ॥ 51॥

परकीया कलहान्तरिता यथा —

[4]भर्तुयस्य कृते गुरुर्लधुरभूद् गोष्ठी कनिष्ठीकृता
धैर्य कोशधनं गतं सहचरी नीतिः कृता दूरतः ॥
निर्मुक्ता तृणवत् त्रया परिचिता स्त्रोतस्वती विन्दुवत्
स क्रोधादवधीरितो हतधिया मातर्बलीयान् विधिः ॥ 52 ॥

1. रसमंञ्जरी श्लोक क्रमांक ॥49॥ पृष्ठ क्रमांक 131
2. रसमंञ्जरी श्लोक क्रमांक ॥50॥ पृष्ठ क्रमांक 132
3. रसमञ्जरी श्लोक क्रमाक ॥51॥ पृष्ठ क्रमांक 133
4. रसमंञ्जरी श्लोक क्रमांक ॥ 52 ॥ पृष्ठ क्रमांक 134

सामान्यवनिता कलहान्तरिता यथा —

[1]यत्पङ्केरुहलक्ष्मपाणिकमलं भाग्यालये यद्गुरु -
न्र्यस्तं वा मम तल्ललाटफलके भाग्याक्षरं वेधसा ॥
तत्सर्वं सखियो यथार्थमकरोत्तस्मिन्प्रकोपः कृतो
धिङ् मां धिङ् मम जीवितं धिगतनु। धिक् चेष्टितं धिग्वयः ॥ 53 ॥

सङ्केतनिकेतने प्रियतममनवलोक्य समाकुलहृदया विप्रलब्धा । अस्याश्चेष्टाः - निर्वेदनिःश्वाससन्तापाऽडलाप - भय - सखीजनोपालम्भचिन्ताश्रुपातमूर्च्छादयः ।

मुग्धा विप्रलब्धा यथा —

[2]आलीभिः शपथैरनेककपटैः कुञ्जोदरं नीतया
शून्यं तच्च विलोक्य विक्षुभितया न प्रस्थितं न स्थितम् ॥
न्यस्ताः किन्तु नवोढनीरजदृशा कुञ्जोपकण्ठे तृषा -
ताम्यद्भृङ्गकदम्बश्चमत्कारस्पृशो दृष्ट्यः ॥ 54 ॥

मध्या विप्रलब्धा यथा —

[3]सङ्केतकेलिगृहमेत्य निरीक्ष्य शून्य -
मेणीदृशो निभृतनिः श्वासिताधरायाः ॥
अर्द्धाक्षिरं वचनमर्द्धविकाशि नेत्रं
ताम्बूलमर्द्धकवलीकृतमेव तस्थौ ॥ 55 ॥

1. रसमंञ्जरी श्लोक क्रमांक ॥ 53 ॥ पृष्ठ क्रमाक 137
2. रसमंञ्जरी श्लोक क्रमांक ॥ 54 ॥ पृष्ठ क्रमाक 139
3. रसमंञ्जरी श्लोक क्रमांक ॥ 55 ॥ पृष्ठ क्रमांक 140

प्रोढा विप्रलब्धा यथा —

[1]शून्यं कुञ्जगुहं निरीक्ष्य कुटिलं विज्ञाय चेतोभवं
दूती नापि निवेदिता सहचरी पृष्टापिनो वा तया ।
शम्भो शंङ्कर चन्द्रशेखर हर श्रीकण्ठ शूलिन् शिव
त्रायस्वेति परं तु पङ्कजदृशा भर्गस्य चक्रे स्तुतिः ॥ 56 ॥

[2]दतवा धैर्यभुजङ्गमूर्ध्नि चारणावुल्लङ्ध्य लज्जानदो -
मङ्गीकृत्य धनन्धकारपटलं तन्व्या न दृष्टः प्रियः ।
सन्तापाकुलया तया च परितः पाथोधरे गर्जति
क्रोधाक्रान्तकृतान्तमतमहिषभ्रान्त्या दृशो योजिरे ॥ 57 ॥

सामान्यवनिता विप्रलब्धा यथा —

[3]कपटवचनभाजा केनचिद्दारयोषा
सकलरसिकगोष्ठीवञ्चिका वञ्चितासौ ।
इति विहसति रिङ्गद्भृङ्गविक्षिप्तचक्षु-
र्विकचकुसुमकान्तिच्छद्मना केलिकुञ्जः ॥ 58 ॥

सङ्केतस्थलं प्रति भर्तुरनागमकहरणं चिन्तयति सा उत्का । अवधिदिवसानागत् प्रोषितपतिकायां नाव्याप्तिः, तस्या भर्तुरवधिदिवसे भवनागमननियम इति सङ्केतपदेन तद्व्यावर्तनात्। अस्याश्चेष्टाः - अरतिसन्तापज्दम्भाङ्गाकृष्टिकम्परुदितस्वावस्थाकथनादयः॥

मुग्धा उत्का यथा —

1. रसमञ्जरी श्लोक क्रमाक ॥ 56 ॥ पृष्ठ क्रमांक 141 - 142
2. रसमञ्जरी श्लोक क्रमांक ॥ 57 ॥ पृष्ठ क्रमाक 143 - 144
3 रसमंञ्जरी श्लोक क्रमाक ॥ 58 ॥ पृष्ठ क्रमांक 145

[1]यन्नाद्यापि समागत: पतिरिति प्राय:प्रवेदे परा-

मित्थं चेतसि चिन्तयत्यपि सखीं न वीडया पृच्छति ।।

दीर्घ न खसितं दधाति चकितं न प्रेक्षते केवलं

किञ्चित्पक्वपलाण्डुपाण्डुररुचिं धत्ते कपोलस्थलीम् ।। 59 ।।

मध्या उत्का यथा —

[2]आनेतुं न गता किमु प्रियसखी भीतो भुजङ्गात्किमु

क्रुध्दो वा प्रतिषेधवाचि कमसौ प्राणेश्वरो वर्तते ।

इत्यं कर्णसुवर्णकेतकरज: पातोपधातच्छला -

दक्षणो: कापिनवोढनीरजमुखी वाष्पोदकं मुञ्चति ।। 60 ।।

प्रोढोत्का यथा —

[3]भ्रातर्निकुञ्ज सखि यूथि रसालबन्धो

मातस्तमखिनि पितस्तिमिर प्रसीद् ।

पृछामि किंचिदिह नीरधराभिरामो

दामोदर: कथय किं न समाजगाम ।। 61 ।।

परकीया उत्का यथा —

[4]स्नातं वारिदवारिभिर्विरचितो वासो धने कानने

शीतैश्चन्दनविन्दुभिर्मनसिजो देष: समाराधित: ।

नीता जागरणव्रतेन रजनी व्रीडा कृता दक्षिणा

तप्तं किं न तपस्तथापि स कथं नायातिनेत्रातिथि: ।। 62 ।।

---

1. रसमंञ्जरी श्लोक क्रमांक ।। 59 ।। पृष्ठ क्रमाक 147 - 148
2. रसमंञ्जरी श्लोक क्रमांक ।। 60 ।। पृष्ठ क्रमाक 148
3. रसमञ्जरी श्लोक क्रमांक ।। 61 ।। पृष्ठ क्रमाक 151
4. रसमंञ्जरी श्लोक क्रमांक ।। 62 ।। पृष्ठ क्रमांक 152

सामान्यवनिता उत्का यथा —

[1]कथं न कान्तः समुपैति कुञ्जमित्थं चिरं चेतसि चिन्तयन्ती।
अक्षालयन्निष्पतदश्रुधारा वाराङ्गना कापि धनाभिलाषान्॥ 63 ॥

अद्य मे प्रियवार इति निशिचिंत्य या सुरतसामग्रीं सम्पादयति सा वासकसज्जा। वासको वारः। अस्याश्चेष्टाः - मनोरथ - सखीपरिहास - दूतिप्रश्न - सामग्रीसम्पादन -मार्गविलो - कनादयः।

मुग्धा वासकसज्जा यथा —

[2]हारं गुम्फति तारकातिरुचिरं ग्रथ्नाति काञ्चीलतां
दीपं गुम्फति तारकातिरुचिरं वहलस्नेहं न धत्ते पुनः।
आलीनामिति वासकस्य रजनौ कायानुरुपां क्रियां
सा विस्मेरमुखी नवोढसुमुखी दूरात्समुद्वीक्षते ॥ 64 ॥

मध्या वासकसज्जा यथा —

[3]शिल्पं दर्शयितुं करोति कुतुकात्कह्लारहारस्त्रजं
चित्रप्रक्षणकौतुकेन किमपि द्वारं समुद्वीक्षते ।
गृहणात्याभरणं नवं सहचरी भूषाजिगीषामिषात्
इत्थं पद्मदृशः प्रतीत्य चरितं स्मेराननोऽभूत्स्मरः ॥ 65 ॥

प्रगल्भा वासकसज्जा यथा —

1. रसमंञ्जरी श्लोक क्रमांक ॥ 63 ॥ पृष्ठ क्रमांक 153
2. रसमंञ्जरी श्लोक क्रमांक ॥ 64 ॥ पृष्ठ क्रमांक 155
3 रसमञ्जरी श्लोक क्रमाक ॥ 65 ॥ पृष्ठ क्रमाक 157

[1]कृतं वपुषि भूषणं चिकुरधोरणी धूपिता
कृता शयनसन्निधौ क्रमकवीटिकासम्भृतिः ।
अकारि हरिणीदृशा भवनमेत्य देहत्विषा
स्फुरत्कनककेतकीकुसुमकान्तिभिर्दुर्दिनम् ॥ 66 ॥

मनोरथश्च यथा —

[2]आवयोरङ्ग यद्द्वैते भूयो विरहविप्लवः ।
अद्वैते च स्मितं स्फीतं न स्यादन्योन्यवीक्षणम् ॥ 67 ॥

परकीया वासकसज्जा यथा —

[3]श्वश्रूं स्वापयति च्छलेन च विरोधत्ते प्रदीपाङकुरान्
धत्ते सौधकपोतपोतनिनदैः साङ्केतिकं चेष्टितम् ।
शरवत्पार्श्वविवर्तिताङ्गलतिकं लोलत्कपोलद्युतिं
क्वापिक्यापि कराम्बुजं प्रियधिया तल्पान्तिकं न्यस्यति ॥ 68 ॥

सामान्यवनिता वासकसज्जा यथा —

[4]चोलं नीलनिचोलकर्षणविधौ चूडामणिं चुम्बने
याचिष्ये कुचयोः करार्पण विद्यौ काञ्चीं पुनः काञ्चनीम् ।
इत्यं चन्दनचर्चितैर्मृत्रमदैरङ्गानि संस्कुर्वति
तत्किं यन्न मनोरथं वितनुते वारेषु वाराङ्गना ॥ 69 ॥

सदा साकूताज्ञाकर प्रियतमा स्वाधीनपतिका । अस्याश्चेष्टाः वनविहारादिमदनोत्सवमदाहङ्कारमनोरथावाप्तिप्रभृतयः ।

1. रसमञ्जरी श्लोक क्रमांक ॥ 66 ॥ पृष्ठ क्रमांक 158
2. रसमंञ्जरी श्लोक क्रमाक ॥ 67 ॥ पृष्ठ क्रमांक 159
3. रसमञ्जरी श्लोक क्रमांक ॥ 68 ॥ पृष्ठ क्रमाक 160
4. रसमंञ्जरी श्लोक क्रमाक ॥ 69 ॥ पृष्ठ क्रमांक 162

मुग्धा स्वाधीनपतिका यथा —

[1]मध्ये न क्रशिमा स्तने न गरिमा देहे न वा कान्तिमा
श्रोणौ न प्रथिमा गतौ न जडिमा नेत्रे न वा वक्रिमा।
लास्ये न द्रढिमा न वाचि पटिमा हास्ये नवा स्कीतिम:
प्राणेशस्य तथापि मज्जति मनो मध्येव किं कारणम् ॥ 70 ॥

मध्या स्वाधीनपतिका यथा —

[2] यदपि रतिमहोत्सवे नकारो यदपि करेणनीविधारणानि।
प्रियसखि पतिरेष पार्श्वदेशं तदपि न मुञ्चति चेत्किमाचरामि ॥ 71॥

प्रौढा स्वाधीनपतिका यथा —

[3] वकत्रस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य वा
धन्यानामरविन्दसुन्दरदृशां कान्तस्तनोति स्तुतिम्।
स्वप्नेनापि न गच्छति श्रुतिपथं चेत:पथं दृक्पथं
क्वाप्यन्या दपितस्य मे सखि कथं तस्यास्तु भेदग्रह: ॥ 72 ॥

परकीया स्वाधीनपतिका यथा —

[4] स्वीया: सन्ति गृहे सरोरुहदृशो यासां विलासक्वणत्
काञ्चीकुण्डलाहेमकङ्कणझणत्करो न विश्राम्यति
को हेतु: सखि कानने पुरपथे सौधे सखिसन्निधौ
भ्राम्यन्तीमपि वल्लभस्य परितो दृष्टिर्न मां मुञ्चति ॥ 73 ॥

1 रसमञ्जरी श्लोक क्रमाक ॥ 70 ॥ पृष्ठ क्रमांक 164
2. रसमञ्जरी श्लोक क्रमाक ॥ 71 ॥ पृष्ठ क्रमांक 165
3. रसमञ्जरी श्लोक क्रमांक ॥ 72 ॥ पृष्ठ क्रमाक 166
4. रसमञ्जरी श्लोक क्रमांक ॥ 73 ॥ पृष्ठ क्रमांक 167

सामान्यवनिता स्वाधीनपतिका यथा —

[1] सन्त्येव प्रतिमन्दिरं मृगदृशो यासां सुधासागर -
स्त्रोतःस्यूतसरोजसुन्दर चमत्कारा दृशोर्विभ्रमा ।
चित्रं किन्तु विचित्रमन्मथकलावैचित्र्यहेतोः पुनः
र्वितं चित्तहरं प्रयच्छति युवा मय्येव किं कारणम् ॥ 74 ॥

स्वयमभिसरति प्रियमभिसारति वा साभिसारिक । अस्याश्चेष्टाः — समयानुरुप- वेषभूणशङ्का- प्रज्ञानैपुण्यकपटसाहसादय इति परकीयया: स्वकीयायास्तु स एव क्रम: ।

मुग्धाभिसासिका यथा —

[2]दूती विद्युदुपागता सहचरी रात्रिश्चिरथायिनी
दैधज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां शभाम् ।
वाचं माङ्गलिकीं तनोति तिमिरस्तोमोऽपि झिल्लीखै -
र्जातोऽयं दयिताभिसारसमयो मुग्धे विमुञ्च त्रपाम् ॥ 75 ॥

मध्याभिसारिका यथा —

[3]भीतासि नैव भुजगात् पथि मद्भुजस्य
सङ्गे पुनः किमपि कम्पमुरिकरोषि ।
अम्भोधरध्वनिभिरक्षुभितासि तन्वि
मद्वाचि साचिवदनादि किमाचरामि ॥ 76 ॥

---

1. रसमंञ्जरी श्लोक क्रमांक ॥ 74 ॥ पृष्ठ क्रमांक 168
2. रसमंञ्जरी श्लोक क्रमाक ॥ 75 ॥ पृष्ठ क्रमांक 172
3. रसमंञ्जरी श्लोक क्रमांक ॥ 76 ॥ पृष्ठ क्रमांक 173

प्रौढाभिसारिका यथा —

[1]स्फुरदुरसिजभारंभङ्गराङ्गी किसलयकोमलकान्तिना पदेन ।
अथ कथय कथं सहेत गन्तुं यदि न निशासु तनोरथो रथः स्यात् ॥ 77 ॥

परकीयाभिसारिका यथा —

[2] रभसादभिसर्तुमुद्यतानां वानितानां सखि वारिदो विवस्वान् ।
रजनीदिवसोऽन्धकारमर्चिर्विपिनं वेश्म विमार्ग एव मार्गः ॥ 78 ॥

ज्योत्स्नाभिसारिका यथा —

[3] चन्द्रोदये चन्दनमङ्गकषु विहस्य विन्यस्य विनिर्गतायाः ।
मनो निहन्तुं मदनोऽपि वाणान् करेण कौन्दान् विभराञ्चकार ॥ 79 ॥

कृष्णाभिसारिका यथा —

[4] नाम्बुजैर्न कमलैरुपमेयं स्वैरिणीजनविलोचनयुग्मम् ।
नो दये दिनकरस्य न चेन्दोः केवले तमसि यस्य विकासः ॥ 80 ॥

दिवाभिसारिका यथा —

[5] पल्लीनामधिपस्य पङ्कजदृशां पर्वोत्सवामन्त्रणे
जाते सद्मजना मिथः कृतमहोत्साहं पुरः प्रस्थिताः ।

---

1 रसमंञ्जरी श्लोक क्रमांक ॥ 77 ॥ पृष्ठ क्रमाक 174
2 रसमञ्जरी श्लोक क्रमाक ॥ 78 ॥ पृष्ठ क्रमाक 175
3. रसमंञ्जरी श्लोक क्रमाक ॥ 79 ॥ पृष्ठ क्रमाक 176
4. रसमंञ्जरी श्लोक क्रमांक ॥ 80 ॥ पृष्ठ क्रमांक 177
5 रसमञ्जरी श्लोक क्रमांक ॥ 81 ॥ पृष्ठ क्रमाक 178

सव्याजं स्थितयोर्विहस्य गनयोः शुद्धान्तमत्रान्तरे
यूनोः स्विन्नकपोलयोविजयते कोडप्येष कण्ठग्रहः ॥ 81 ॥

सामान्यभिसारिका यथा —

[1] लोलच्चेलचमत्कृतिप्रविलसत्काञ्चीलताझङ्कृति-
न्यञ्चत्कञ्चुकबन्धुरवलदृक्षोकुम्भोन्नति ।
स्फूर्जद्दीधिति विस्फुरद्गति चलच्चामीकराङ्कृति
क्रीडाकुञ्जगृहं प्रयाति कृतिनः कस्यापि वाराङ्गना ॥ 82 ॥

मुग्धाया लज्जाप्राधान्येन, मध्यायां लज्जाभदनप्राधान्येन, प्रौढाया प्रकाश्यप्राधान्येन, धीराया धैर्यप्राधान्येन, अधीराया अधैर्यप्राधान्येन, धीराधीराया धैर्याधैर्यप्राधान्येन, ज्येष्ठायाः स्नेहाधिक्यप्राधान्येन, कनिष्ठाया, स्नेहन्यूनत्वप्राधान्येन, परोढायाः संगुप्तिप्राधान्येन, मुग्धाया इव कन्यकायाश्च सामान्यवनिताया धनप्राप्तिप्राधान्येनाष्टविधानायिकावर्णनमिति विशेषः ॥

[2] प्रस्थानं वलयैः कृतं प्रियसखैरस्त्रैरजस्त्रं गतं
धृत्वा न क्षणमासितं व्यवसितं चितेन गन्तुं पुरा ।
यातुं निश्चितचेतसि प्रियतमे सर्बे समं प्रस्थिताः
गन्तव्ये सति जीवित प्रियसुहृत्सार्थः किमुत्सृज्यते ॥ 83॥

इत्यादि प्राचीनग्रन्थलिखनादग्रिमक्षणे देशान्तरगमननिश्चिते प्रेयसि प्रोत्यत्पतिका कापि नवमी नायिका भवितुमर्हति। तथा हि तस्याः प्रोषितपतिकाविप्रलब्धोत्कासु नान्तभविः भर्तुःसन्निधिवर्तित्वात्। नापि नवमी नायिका भवितुमर्हति, भर्तुः सन्निधिवर्तित्वात् । नापि कलहान्तरितायामन्तभविः, कलहाभावादानपभानितपतित्वाच्च। न खण्डितायाभन्तभावाः, प्रियस्यान्योपभोगचिह्नि-तस्यागमनाभावात्, प्रियायाः कोपसन्दर्शनान्तर्भावादर्शनात्

1. रसमञ्जरी श्लोक क्रमांक ॥ 82 ॥ पृष्ठ क्रमांक 180
2 रसमञ्जरी श्लोक क्रमाक ॥ 83॥ पृष्ठ क्रमांक 182

काकुवचनकातरप्रक्षणादि पक्षपातदर्शनाच्च न च वासकसज्जायामन्तर्भाव: । वारनियमाभावात्, सज्जीकरणभावनिर्वेदर्शनाच्च । न चस्वाधीनपतिकायामन्तर्भाव: । अग्रिमक्षण एव सङ्गविच्छददर्शनात्। नहि स्वाधीनपतिकाया: कदाचिदपि सङ्गविच्छेद इति सम्प्रदाय:। व्रजन्नपि पति: स्वाधिनपतिकया निरुध्यते। अन्यथा भर्तरि स्वाधीनत्वमेव भज्यते । ने ह तथा सर्वथा भर्तुर्विदेशगमनात्। किंचिन्निर्वेदाश्रुपातनिश्वासवन विहारादिमदनमहोन्सवा-दिव्यतिरेक-दर्शनाच्च। नाप्यभिसारिकायामन्तभार्व:। अभिसारोत्सवाभावात् अन्तस्ता-पद्र्शनाच्चेति युक्तमुत्पश्याम: ।।

लक्षणं तु यस्या: पतिरगिमक्षणे देशान्तरे यास्यत्येव सा प्रोष्यत्पतिका। अस्याचेष्टा: काकुवचनकातरप्रेक्षणगमनविध्नोपदर्शननिर्वेदसन्तापसम्मोहनि: खासवाष्पादय: ।।

मुग्धा प्रोष्यत्पतिका यथा —

[1]प्राणेश्वरे किमपि जल्पति निर्गमाय
क्षामोदरी वदनमानमयाञ्चकार।
आली पुनर्निभृतमेत्य लतानिकुञ्जम्
उन्मत्तकोकिलकलध्वनिमाततान ।। 84 ।।

मध्या प्रोष्यत्पतिका यथा —

[2]गन्तुं प्रिये वदति नि:श्वासितं न दीर्ध -
मासीन्न वा नयनयोर्जलमाविरासीत्।
आयुर्लिपिं पठतुभेणदृश: परन्तु
भालस्थलं किमु कच: समुपाजगाम ।। 85 ।।

1. रसमंञ्जरी श्लोक क्रमांक ।। 84 ।। पृष्ठ क्रमांक 188
2. रसमंञ्जरी श्लोक क्रमाक ।। 85 ।। पृष्ठ क्रमांक 189

प्रौढा प्रोष्यत्पतिका यथा —

[1]नायं मुञ्चति सुभ्रुवामपि तनुत्यागे दियोगज्वर -
स्तेनाहं विहिताञ्जलिर्यदुपते पृच्छामि सत्यं वदः।
ताम्बुलं कुसुमं पटीरमुदकं यद्वन्धुभिर्दीयते
स्यादत्रैव परत्र तत्किमु विषज्वालावलीदुःसहम्॥ 86॥

नाटयदर्पणकारेणं नायिकानामभेदाः भिन्नरीत्या प्रदत्तम् तन्मते नायिका कुलजा दिव्या क्षत्रिय पण्यकामिनी इति तन्मते नायिका चतुर्धाभवति तासु अंतिमा वेश्या नायिका ललितो दात्ताभवति। कुलजा उदात्ता भवति उभयोः दिव्या तथा क्षत्रिया इति भेदेन धीराललिता उदात्ता इति नायिकायाः प्रकारत्रयम् नाटयदर्पणकारेण वर्णनम् कृतम् कुलजा नायिका विप्र वणिकादि कुले जायमाना अंतिम वेश्या नायिका पण्यकामिनी ललितोदात्ता कामार्थ प्रधानत्वात् भवति। अथ धैर्य लालीत्य उदातत्वेन नायिकायाः प्रकारत्वयम् दिव्यउत्तम् जातिभ्याम् कामार्थ निष्ठत्वातच शांतत्व प्रकारस्तु च भोगभूमि जत्वेन दिव्यानाम् दिव्यसाहार्चोयण।

दशरुपककारेण नायिकायाः भेदत्रयम् प्रदर्शितम् स्वान्या साधारणस्त्रीइति नायिकायाः त्रिभेदाः स्वकीया अन्या साधारणस्त्रीइति भेदत्रयम् नायिकायाः संभवन्ति।

यथा साहित्यदर्पणकारेण मुग्धा मध्या प्रगल्भेति भेदत्रयम् स्वकीयानायिकायाः प्रदर्शितम् तथैव दशरुपकारेण अपि मुग्धा, मध्या प्रगल्भा इति भेदेन। स्वकीयायाः भेदत्रयम् उक्तम्। शीलआर्जेवादि गुणैः युक्ता स्वकीया नायिका शीलं सदगुणोपेतम् पतिव्रता अकुटिल। लज्जावति पुरुषोपचार निपूण भवति एषा नायिका पतिसेवा परायणा सदाचारादिगुणैः युक्ता भवति। दशरुपककारेण स्वकीया नायिकायाः लक्षणम् वर्णयम् तस्य उदाहरणम् अपि प्रदत्तम्।

[2] कु ल वालिकायाः प्रक्षेध्वं यौवनलावण्यविभ्रमविलासाः।
प्रवसन्तीव प्रवसिते आगच्छन्तीव प्रिये गृहभागते॥ 1॥

---

1. रसमंञ्जरी श्लोक क्रमांक ॥ 86॥ पृष्ठ क्रमांक 191
2. दशरुपक द्वितीय प्रकाश श्लोक क्रमांक ॥ 1॥ पृष्ठ क्रमांक 189

[1] हसितमविचारमुग्धं भ्रमितं विरहितविलाससुच्छ्यम्।
भणितं स्वभावसरलं धन्यानां गृहे कलत्राणाम् ॥ 2 ॥

दशरुपकारेण स्वकीया नायिकाया: भेदत्र्यम् प्रदर्शय मुग्धा, मध्या, प्रगल्भा नायिकाया: उदाहरणम् अपि प्रदत्तम्।

मुग्धा: —

मुग्धा नववय: कामा रतौ वामा मृदु: क्रुधि। एषा नायिका प्रथमावतीर्ण तारुण्य युक्ता रमणे वामशीला सुखोपाय प्रसाधना भवति ।

(अ) वयोमुग्धा —

बिस्तारी स्तनभार एष गमितो न स्वोचितामुन्नतिम्।
रेखोद्भासिकृतं बलित्रयमिर्द न स्पष्टनिम्नोन्नतम्॥
मध्येऽस्या ऋजुरायतार्धकपिशा रोमावली निर्मिता।
रम्यं यौवनशैशवव्यतिकरोन्निग्रं वयो वर्तते ॥

दशरुपकारमते मुग्धा नायिकाअपि चर्तुधा भवति। वयोमुग्धा काममुग्धा रतिवाम: मृदुक्रोधे इति च ।

मध्येऽस्या ऋजुरायतार्धकपिशा रोमावली निर्मिता।
रम्यं यौवनशैशवव्यतिकरोन्निग्रं वयो वर्तते ॥

दशरुपकारमते मुग्धा नायिकाअपि चर्तुधा भवति। वयोमुग्धा काममुग्धा रतिवाम: मृदुक्रोधे इति च ।

1. दशरुपक द्वितीय प्रकाश श्लोक क्रमांक ॥ 2 ॥ पृष्ठ क्रमांक 190

# नायिका - लक्षणम्

भारतो धनञ्जयश्चोभौ श्रृङ्गारे कामोपभोगेवलासे च परायणां प्रकृतिमेव प्रायोनिदर्शयत:। नायिका श्रृंगारवृतौ प्राधान्यं भजते।

भरतानुसारेण कामोपभोगाय नायिका: त्रिविधा भवन्ति - बाह्या:, बाह्याभ्यन्तरा:, आभ्यन्तराशाच।[1] बाह्या नायिका वेश्या: सन्ति प्रकरणे प्रयोज्या:। आभ्यन्तरास्तु अन्त:पुरे राजभोग्या नाटकोचिता भवन्ति। बाह्याभ्यन्तरा: तु एकावरुद्धा वेश्या भवन्ति।[2]

राज्ञो नायिका वेश्या न भवेत्, किन्तु दिव्यवेशाङ्गना नायिका भेवतुमर्हति, यथा विक्रमोर्वशीये। धनञ्जयस्य स्वीया साधारण-स्त्री च, भरतस्य कुलजा, बाह्या च स्त:। बाह्याभ्यन्तरा धनञ्जयेन न दृष्टा।

भरतोऽष्टविधानायिका अपश्यत्। तद्यथा, वासकसज्जिका, विरहोत्कण्ठिता, स्वाधीनभतृका, कलहान्तरिता , खण्डिता, विप्रलब्धा, प्रोषितभतृका, अभिसारिका च । एता: सर्वा विवाहस्य पश्चाद्वर्तिन्यो नायिका:। विवाहात्पूर्वमेव रुपकेषु कामसमुत्पत्तिर्नाम यदभिष्टतमो विषय: कविनां प्रक्षकाणां च, स भरतेन सम्पक् पर्यालोचित:, किन्तु धनञ्जयेनेषद्दत्तावधानोऽयं प्रसंङ्ग:।

भरतस्तावत् कविमार्गप्रदर्शयितुकामो नायिकाया: पुरतो नायकादर्श प्रस्तुतवान् —

रुपगुणदिसमेत्तं कलादिविज्ञान - यौवनोपेतम् ।
दष्ट्वा पुरुषविशेषं नारी मदनातुरा भवति ॥

मदनातुराया वेश्याया कुलजायाश्च शरीरविकारा: कीदृशो भवन्तीति भरतेन

---

1. बाह्या चाय्यन्तरा चैव बाह्याभ्यन्तरापरा।
कुलीनाभ्यन्तरा क्षेया बाह्या वेश्याङ्गना स्मृता।
कृतशौचा तु नारी सा बाह्या भ्यन्तरा स्मृता॥ ना० शा० 22 152-3
2. सा च वेश्या पुनभर्वा। ना० शा० 22.153. अधिकृत्य भारती

राम्यग्वर्णितम्। तद्यथा नायकसमक्षं नायिका - विकाराः —

वेश्याविकाराः

ललिता चलपक्ष्मा च तथा च मुकुलेक्षणा।
स्त्रस्तोत्तरपुटा चैव काम्या दर्भिर्विवेदिह॥

ईषत्- संस्क्तगण्डस्तु सस्वेदलवचित्रितः।
प्रस्पन्दमानरोमाञ्चो मुखरागो भवेदिह॥

काम्येनाङ्गविकारेण सकटाक्षनिरीक्षितैः।
तथाभरण - संस्पर्शैः कर्ण- कण्डूयनैरपि॥

[1]अङ्गुष्ठाग्रविलिखनैः स्तननाभिप्रदर्शनै।
नखनिस्तोदनाच्चैव केशसंयमनादपि॥ ना० शा० 22.161-165

कुलजा-विकाराः

प्रहसन्ती च नेत्राभ्यां प्रततं च निरीक्षते।
स्मयते सा निगूढच वाचं चाधोमुखी वदेत्॥

[2]स्मितोतरा मन्दवाक्या स्वेदाकारनिगूहनी।
प्रस्पन्विताधरा चैव चकिता च कुलाङ्गना॥ ना० शा० 22.167-168

नायकसङ्गमलभमाना मदनातुरा नायिका दर्शस्थानगतं कामं प्रदर्शयति-अभिलाषः,

1. ना०शा० 22.161-165
2. ना०शा० 22.167-168

चिन्तनम्, अनुस्मृतिः, गुणकीर्तनम्, उद्वेगः, विलापः, उन्मादः, व्याधिः, जडता, मरणञ्च। [1] पूर्वोक्तमदनातुरा नायिका नायकं प्रति आत्मावस्थाप्रदर्शिनी दूतीं प्रषयति।[२]

राज्ञां प्रच्छन्नकामिता

भरतस्तावत् प्रच्छन्नकामिता श्रृंङ्गारस्याभिष्टतमं प्रापणीयं मन्यते। तथा हि —

[3]प्रच्छन्नकामितं राज्ञा कार्यं परिजनं प्रति।
यद्वामाभिनिवेशित्वं यतश्च विनिवार्यते।
दुर्लभत्वं च यन्नर्याः सा कामस्य परा रतिः॥
ना०शा० 22.207

अभिनवगुप्तानुसारेण राज्ञामियं प्रच्छन्नकामिता बभूव । तत्र ऊढा, पुनर्भूः, अवरुद्ध-गणिका, कन्यका, प्रेष्या च राजकीय-प्रणयपाशेऽवरुद्धा आसन्।[4] अभिनवगुप्तः स्पष्टयति — धर्मवृत्तिना राज्ञा परिचार्यो द्रेष्यादुर्भगा अपि सीव्या इति। एतासु नायिकासु धनञ्जयः केवलं कन्यकामूढां च वर्णयति।[5]

## अष्टविधा नयिकाः

नायकप्रणयाबद्धानां नायिकानामख भेदा अवस्थापेक्षयाधोनिभिन्नाः —

स्वाधीनपतिका

1. ना०शा० 22.173-181
2. दूता अपि विसृज्यन्त एतदर्थमिति न क्वर्चिन्निर्दिष्टम्। बहुषु भाणेषु नायिकादूता बिटा एव सन्ति।
3 ना०शा० 22.207
4. इदं प्रकरण तात्कालिकी राजकीयप्रवृत्ति प्रकटयति । आदर्शविमुखा एते राजानः समाराजस्य पतनाय बभूवुः, यतो हि नाम समाजो राजनमेवानुवर्तते। यथा भरत आह — "यान् यान् प्रकुरुते राजा तान्स्तान् लोकोऽनुवर्तते।" अत्र नेदं विस्मरणीय य् योरपीय-देशेषु राज्ञां नागरिकाणा च प्रणव - परिधिरतिबृहद् बभूवेति तत्रत्यनाटकानामितिवृत्तैः प्रसिद्धम्।
5 दश० 2. 20 अन्यस्त्रो कन्यकोढा च ।

भरतनुसारतः

[1]सुरतातिरसैर्बद्धो यस्याः पार्श्वे तु नायकः।
सान्द्रामोदगुणाप्राप्ता भवेत् स्वाधीन - भर्तृका ।। 22. 215

धनञ्जयस्तु संक्षेपेणानुहरति भरतमस्मिन् प्रकरणे।

## वासकसज्जा

वासकं तु शयनगृहमस्ति। नायकस्य प्रणयमिलन- संभवनामपेक्ष्य वासकस्य सज्जां(मन्डनम्) नायिका विदधाति। एवं व्यापृता नायिका वासकसज्जेत्यभिधीयते। भरतस्तां परिभाषते।-

[2]उचिते वासके या नु रतिसम्भोगलालसा।
मन्डनं कुरुते हृष्टा सा वै वासकसज्जिका।।
ना० शा० 22.213

धनञ्जयस्तु भरतं संक्षेपणानुारत्येव।

## विराहोत्कण्ठिता

भरतानुसारतः वासकसज्जाया नायको यदि यथासमयं नायाति तर्हि सा विरहोत्कण्ठिता भवति।

---

1. ना० शा० 22.215
2. ना० शा० 22.213

वासके नागतः प्रियः।

धनञ्जयो भरतमेवानुहरति।

खण्डिता

भरतधनञ्जयौ तां नायिकां खण्डितां वदतो यस्याः रमणोऽन्यनायिकासक्त्या तां न संगच्छते।

कालहान्तरिता

पत्या कलहकारिणी नायिका कलहान्तरं तस्माद्विदूरा भवति। सामर्ष च कुरुते। नायकस्तु ईर्ष्यावशीभूतस्तां न मिलति। ईदशी नायिका कलहान्तरिता भवति। धनञ्जयस्तामनुशयभावापन्नामपि लक्षयते।

विप्रलब्धा

दूतद्वरेण संगमनार्थं प्रतिज्ञाय यदि नायको नागच्छेत् तर्हि नायिका विप्रलब्धा भवतीति भरतधनञ्जययोर्मतम्।

प्रोषितप्रिया

यस्या नायिकायाः प्रणयी प्रवासं करोति, सा यथानाम प्रोषितप्रिया भवति। भरतस्तस्या रुपं वर्णयति —

[1]प्ररुढालककेशान्ता भवेत् प्रोषितभर्तृका । 22.218

अभिसारिका

1. ना० शा० 22.218

धनञ्जयस्याभिसारिका तु संक्षेपेण वर्णिता—

कामार्ताभिसरेत्कान्तं सारयेद्वाभिसारिका। 2.27

भरतस्तावदभिसारिकाया विस्तृतं लक्षणं ब्रूते —

हित्वा लज्जां तु या श्लिष्टा मदनेन च ।
अभिसारयते कान्तं सा भवेदभिसारिका॥

अभिनवगुप्तो व्याख्याति – अभिसरः सहायः। तस्य व्यापारेण प्रियतममक्रामति।

अभिसारिका तु वेश्या वा कुलजा वा प्रष्या वा भवेत्। अभिसरणकाले तासां भावविशेषा भरतेन वर्णिताः —

**वेश्या**

[1]समदा मृदुचेष्टा च तथा परिजनावृता।
नानाभरणचित्राङ्गी गच्छेद् वेश्याङ्गना शनैः॥ 22.227

**कुलजा**

[2]संलीना स्वेषु गात्रेषु त्रस्ता विनमिताननना ।
अवगुण्ठसंवीता गच्छेत्तु कुलजाङ्गना ॥ 22.228

**प्रेष्या**

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना।
आविद्धगतिसंचारा गच्छत् प्रष्या समुद्धतम्॥ 22.228

1. ना०शा० 24.23-27
2. ना०शा० 24.23-28

सुप्तं नायकं केन विधिना जागरयेदिति भरतेन प्रोक्तम् —

[1]अलंकारेण कुलजा वेश्या गन्धैस्तु शीतलैः ।
प्रेष्या तु वस्त्रव्यजनैः कुर्वीत प्रतिबोधनम् ॥22.231

भरतस्तु राजकीयनायिकानां परिगणनं समन्ततः प्रस्तौति । धनञ्जयस्तु तासामवहलनामेव प्रदर्शयते । नाटकनाटिकादिषु महादेवी-प्रभृति-नायिकानां स्थानं महत्वपूर्ण वर्तते, किन्तु धनञ्जयस्ता न परिभाषत इति तस्य तुटिरेव । एतत्प्रकारणं तु भरतानुसारेणावधेयम् ।

नानाप्रकृतिलक्षणा नायिका धीरा, ललिता, उदाता, निभृता च राजकीया भवन्ति । एते भेदाश्चतुर्विधानां दिव्या-नुपपत्नी-कुलस्त्री-गणिकानां च भवन्ति । तत्र मिव्या राजाङ्नाश्च गुणैक्ता भवन्ति । कुलजाङ्नग उदात्ता, निभृताश्च भवन्ति । गणिका शिल्पकारिका च ललिते अभ्युवाते च स्तः ।[2]

## अन्तःपुरचारिण्यस्त्रियः

भरतोऽन्तःपुरस्थनारीणां परिचयं सम्यक् प्रस्तौति । तद्यथा ,

[3]महादेवी तथा दिव्यः स्वामिन्यः स्थापिता अपि ।
भोगिन्यः शिल्पकारिण्यो नाटकीयाः सनर्तकाः ॥
अनुचारिकाश्च विज्ञेयास्तथा परिचारिकाः ।
तथा संचारिकाश्चैव च प्रषणकारिकाः ॥
महत्तयी प्रतीहार्यः कुमार्यः स्थविरा अपि ।
आयुक्तिकाश्च नृपतेरयमन्तःपुरे जनः ॥ 24.30-32

1. ना०शा० 22.231
2. ना०शा० 24.23-26
3. ना०शा० 24.30-32

एतासु महादेवी- प्रभृति शिल्पकारिणीपर्यन्तं नायिका भवन्ति। एतासां वर्णनमधोविधं नाट्यशास्त्रे विद्यते —

## महादेवी

[1]अत्र मूर्धाभिषिक्त या कुलशील - समन्विता।
गुणैर्युक्ता वयस्या च मध्यस्था क्रोधना तथा॥
मुक्तेषर्या नृपशीलज्ञा सुखदु:खसहा समा।
शान्तिस्वस्त्ययनैर्भर्तु: सततं मंगलैषिणी॥
शान्ता पतिव्रता धीरा चान्त:पुरहिते रता।
एभिगुणैस्तु संयुक्ता महादेवीत्युदाहृता॥ 24.33-35

अभिनवगुप्तानुसारेण सर्वेषां मूर्धनि प्रधानस्थानेऽभिषिक्ता भवति महादेवी। सा मध्यस्थेति वयसि मध्यमे तिस्ठति। महादेवी तु श्रृङ्गारोचिता नातीव प्रतिभाति। स महादेवी आभिमुखं नायकस्य प्रयाति।

## देवी

[2]एभिरेव गुणैयुक्तास्तत्संस्कारर्विवजिता:।
गर्विताश्चातिसौभाग्या: पतिसम्भोगतत्परा:॥
शुचिनित्योज्ज्वलाकारा: प्रतिपक्षोऽभ्यसूयिका:।
वयोरुपगुणाढ्या यास्ता देव्य इति भाषिता:॥ 24.36.37

तत्र बहवो देव्यो नायिका बभूवु:।

1 ना०शा० 24.33-35
2. ना०शा० 24.36-37

## स्वामिनी

[1]सेनापतेरमात्यानां भृत्यानामथवा पुनः।
भवेयुस्तनया यास्तु प्रतिसम्मानवर्जिताः॥
शीलरुपगुणैसितु सम्पन्ना नृपतेर्हिताः।
स्वगुणेलैब्धसम्मानः स्वामित्य इति ताः स्मृताः॥

ना० शा० 34.38-39

## स्थापिता

[2]रुप-यौवनशालिन्यः कर्कशा विभ्रमान्विताः।
रतिसम्भोग-कुशलाः प्रतिपक्षाभ्यसूयिकाः॥
दक्षा भर्त्तुश्च चितज्ञा गन्धमाल्योज्ज्वलाः सदा।
नृपतेश्छन्दवर्तिन्यो न ह्रीष्र्यामानगर्विताः॥
उत्थिताश्च प्रबत्ताश्च त्यक्तालस्या न निष्ठुराः।
मान्यामान्यविशेषज्ञाः स्थापिता इति ताः स्मृताः॥

ना०शा०34.40-42

## भोगिनी

[3]कुलशिललब्धपूजा मृदवो नातिचोद्भटाः।
मध्यस्था निभृताः क्षान्ता भोगिन्य इति ताः स्मृताः॥

ना०शा० 24.43

## शिल्पकारिका

1. ना० शा० 34.38-39
2. ना०शा०34.40-42
3. ना०शा० 24.43

नानाकला-विशेषज्ञा नानाशिल्पविचक्षणाः ।
गन्धपुष्पविभागज्ञा लेख्यालेख-विकल्पिकाः ।।
शयनासनभागज्ञाश्चतुरा मधुरास्तथा।
दक्षाः सौम्याः स्फुटाः श्लिष्टा निभृताः शिल्पकारिकाः ।।

राज्ञोऽन्तःपुरेऽन्या बहवो नार्यो नियुक्ता आसन्। तथा हि —

नाटकीया नर्तकी च नाट्यनृत्याभिनयेन मनोरञ्जनार्थमासन्। अनुचारिका सतत राजानमनुचरितस्म। शय्यापाली, छत्रधारी, व्यजनवारिणी, संवाहिका, गन्धयोक्त्री, प्रसाधिका, आभरणयोक्त्री, माल्यसंयोजिका च परिचारिका बभूवुः। राजकीय-कक्षासु, उपवनेषु, मन्दिर-प्रासदेषु संचारिका वा यामकिनी वा रात्रौ रक्षार्थमभवत्। परिचारिका प्रेषणकर्मणि नियुक्तासीत्। महात्तराया विशिष्टं स्थानमसीद् भरतानुसारेण —

सर्वान्तःपुर-रक्षासु स्तुतिस्त्ययनेन च ।
या वृद्धिममिनन्दन्ति ता विज्ञाया महत्तराः ।। 24.58

प्रतीहारी नाटकेषु सुप्रसिद्धैव वर्तते । तस्या कार्याणि भरतेन वर्णितानि —

सन्धि-विग्रह-सम्बद्ध-नानाचार-समुत्यितम्।
निवेदयन्ति याः कार्य प्रतिहार्यस्तु ताः स्मृताः ।। 24.60

अन्तःपुरे वृद्धाः पूर्वराजानां नीतिपथस्य व्याख्यानाय नियुक्ता आसन्। तद्यथा,

पूर्वराजनयज्ञा याः पूर्वराजाभिपूजिताः।
पूर्वराजनुचरितास्ता वृद्धा इति संज्ञिताः ।। 24.62

आयुक्तिकानां स्थानमन्तःपुरचारिणीषु स्त्रीषु सविशेषं वर्तते। तद्यथा —

[1]भाण्डागारेणरेष्वधिकृताश्चायुधाधिकृतास्तथा ।
फलमूलौषधीनां च तथा चैवान्ववेक्षिकी ॥
गन्धाभरणवस्त्राणां माल्यानां चैव चिन्तिकाः ।
बह्वाश्रये तथा युक्ता ज्ञेया ह्यायुक्तिकास्तु ताः ॥

ना॰शा॰ 24.62-64

## नायिकानां स्वभावजाः भेदाः

उत्तमा, मध्यमा, अधमा च नारीणां त्रिविधा प्रकृतिर्भवति। भरतस्तु नायिकादीनां भेदमुत्तमादिगुणैः प्रस्तौति। तथद्या,

सर्वासामेव नारीणां त्रिविधा प्रकृतिः स्मृता।
उत्तमा, मध्यमा, नीचा वेश्यानां तु स्वभावजा॥

**उत्तमा**

[2]या विप्रियेऽपि तिष्ठन्तं प्रिंय वदति नाप्रियम्।
न दीर्घरोषा च तथा कलासु च विचक्षणा ॥
शीलशोभाकुलाधिक्यैः पुरुषैर्या च विचक्षणा।
कुशला कामतन्त्रेषु दक्षिणा रुपशालिनी ॥
गृह् णाति कारणद् रोषं विगतेर्ष्या ब्रवीति च।
कार्यकाल-विशेषज्ञा सुरुपा सा स्मृतोत्तमा॥

ना॰शा॰ 23.35-38

न खलु कवयो नायिकानामेतान् गुणान् वर्णयितुं सदा समुत्सुका दश्यन्ते इति महती

1 ना॰शा॰ 24.62-64
2 ना॰शा॰ 23.35-38

त्रुटिस्तेषां निबन्धानामस्त्येव। नायिकानां कलासु वैचक्षण्यं, शीलं, कार्यकालविशषज्ञत्वं च तिरल-विरलमेव रुपकेषु परिस्फुरन्ति। प्रायशो नायिकानां रुपमेव नायकमाकर्षति। नैषा साधुरीतिर्लोकादर्शसमुपस्थापनापेक्षया।

**मध्यमा**

पुरुषैः काम्यते या तथा कामयते च तान्।
कामोपचारकुशला प्रतिपक्षाभ्यसूचिनी ॥
ईर्ष्यातुरा त्वानिभृता क्षीणक्रोधातिगर्विता।
क्षणप्रसादा या चैव सा नारी मध्यमा स्मृता ॥23.38-40

**अधमा**

अस्थानकोपना या तु दुष्टशीलातिमानिनी।
चपला परुषा चैव दीर्धरोषाधमा स्मृता॥ 23.41

## यौवन - भेदः

भरतो नारीणां विकासानुक्रमेण चतुरो यौवन - भेदान् वर्णयति। रात्र स प्रथमं नारीणां लावण्य - रुपादिकं वर्णयति, पश्चाच्च श्रृंगारं इति तासामुत्साहं चित्रयति। तद्यथा,

**प्रथमयौवनम्**

नेपथ्यरुपचेष्टागुणेन श्रृंगारमासाद्य।
पीनोरुगण्डजधनाधरधरस्तनं कर्कशं रतिमनोज्ञम्॥
श्रृंगार - समुत्साहं प्रथमं तद्यौवनं ज्ञेयम्॥ 23.43

नात्यर्थं क्लेशसहा न कुप्यति न हृष्यति स्त्रीभ्यः।
सौख्यगुणष्ववसक्ता नारी नवयौवना ज्ञेया॥ 23.48

दशरुपके धनञ्जयस्य मुग्धा नायिका भरतस्य प्रथमयौवनवतीव प्रतिभाति। मुग्धा धनञ्जयानुसारेण—

नववयःकामा रतौ वामा मृदुः क्रुधि॥ 2.16

प्रथमयौवनं मुग्धाया भवति ।

**द्वितीयं यौवनम्**

भरतानुसारेण

गात्रं पूर्णावयवं पीनौ च पयोधरौ नतं मध्यम्।
कामस्य सारभूतं यौवनमेतद् द्वितीयं तु॥

द्वितीय - यौवन-भेदे कीदृशः स्वभावो भवति —

[1]किंचित्करोति मानं किंचित् क्रोधं च मत्सरं चैव।
क्रोधे च भवति तूष्णीं यौवन - भेदे द्वितीये तु॥
ना०शा० 23.44-46

भरतस्य द्वितीयं यौवनं तु धनञ्जयस्य मध्यायाः स्यात्। तद्यथा,

मध्यमोद्यद्योवनानङ्गा नोहान्तसुरत-क्षमा ॥ २.१६

1 ना०शा० 23.44-46

धीरा सोत्प्रास- वक्रोक्त्या मध्या साधु कृतागसम्।
खेदयेदयितं कोपादधीरा परुषाक्षरम् ॥ 2.17

## तृतीयं यौवनम्

भरतस्य तृतीयं यौवनं धनञ्जयस्य प्रगल्भायां अवस्था स्यात्। भरतानुसारेण तृतीयं यौवनं तु —

[1]सर्वश्रीसंयुक्तं रतिकरणोत्पादनं रतिगुणाढ्यम्।
कामाप्यायितशोभं यौवनमेतत् तृतीयं तु ॥
रतिसम्भोगे दक्षा प्रतिपक्षासूयिनी रतिगुणाढ्या।
अनिभृतगर्वितचेष्टा नारी ज्ञया तृतिये तु ॥ 23.45-50

धनञ्जयस्येदशी तु प्रगल्भा भवति —[2]

यौवनात्धा स्मरोन्मत्ता प्रगल्भा दयिताङ्के।
विलीगमानेवानन्दाद् रतारम्भेऽप्यचेतना ॥ 2.18

चतुर्थ-यौवनम्

भरतस्य चतुर्थ-यौवनं श्रृंगारस्यान्तिमावस्था भवति । तद्यथा —

नवयौवने व्यतीते तथा द्वितीये तृतीयके वापि।

1. ना शा. 23.45-50
2. प्रगल्भाया: कोपचेष्टा वर्णयन् धनञ्जय आह —
सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा।
सान्तर्ज्य ताडयेन्मध्या मध्या धीरेव तं वदेत् ॥

[1]श्रृंगार-शत्रुभूतं यौवनमेतच्चतुर्थं तु ॥
अम्लानगण्डजघनाधरस्तनं किञ्चिदूनलावण्यम्।
कामं प्रति नोच्छ्वासं यौवनमेतच्चतुर्थंतु ॥
चितग्रहण-समर्था कामाभिज्ञाना त्वमत्सरोपेता।
क्षविरहितमिच्छति सदा पुरुषं नारी चतुर्थे तु ॥

ना०शा० 23.46, 47, 51,

इदं चतुर्थं योवनं धनञ्जयेन न संगृहीतम्।

धनञ्जयस्तु नायिकाविशेषान् सूक्ष्मतरं पर्यालोचयति। नायिकानां कृतागसे नायकंप्रति तर्जनं, ताडनं, परुषाक्षरप्रयोजनञ्च विरल-विरलमीव रुपकेषु प्रवतन्ते, किन्तु परवर्तिनाट्याचार्याः सोत्साहं तान्यधिकृत्य नायिका- प्रभेदान् प्रस्तुवन्ति। धनञ्जयस्तु इदं क्रोधद्भवं वर्तनं नायिकानां सम्यग्वर्णयति। नैतत्सर्व भारतीये नाट्यशास्त्रे प्रकाशितम्।

## अन्यस्त्री

धनञ्जयनुसारेण तु कन्यका ऊढा चान्यस्त्रीति वक्तव्यम्। कन्यकास्तु गान्धर्व-विवाहरीत्या स्वीक्रियन्ते। ऊढाः पुनः भाणादिषु रुपकेषु नायिका दश्यन्ते। अभिनवगुप्तानुसारेणन्त पुरस्य परिचारिका राजः प्रच्छन्नकामितायाः प्रणयानुरागिण्यो नायिका अन्यस्त्रिय एव।[2]

## साधारणस्त्री

साधारणस्त्रीयो गणिकाः सन्ति। ता द्विविधा भवन्ति – एकान्तावरुद्धाः, सर्वभोग्याश्च एकान्तावरुद्धा तु राज्ञामपि प्रणयिनी, भवितुमर्हतीति प्रच्छन्नकामिता - प्रकरणे निर्दिष्टम्। सर्वभोग्या - विषये धनञ्जयो विशदयति —

1 ना०शा० 23.46, 47, 51,
2 इद तु राज्ञां प्रच्छन्नकामिता - प्रकरणे सविस्तर व्याख्यातम्।

[1]छन्नकाम-सुखार्थाज्ञस्वतन्त्राहं युषण्डकान्।
रक्तेव रञ्जयेदाढ्यान्निःस्वान् मात्रा विवासयते॥

दश० 2.22

नायिनाया नायकस्य च परस्परं मिलनं कथं भवेदिति प्रकरणे नायिकानां सहाया धनञ्जयेन परिगणिताः – दूति, दासी, सखी, कारुः, धात्रेयी, प्रतिवेशिका, लिंगिनी, शिल्पनी च।

## योषिदलङ्काराः

नायकस्य यथा सात्त्विकगुणा भवन्ति ,तथैव नायिकाया विंशतिः अलङ्काराः सत्त्वजाः सात्त्विका वा सन्ति। तेषु भावो हावश्चहेला च त्रयः शरीरजा भवन्ति, शोभा, कान्तिः, दीप्तिः, माधुर्यम्, प्रगल्भता,औदार्यम्, धैर्यञ्च सप्त भावा अयत्नजा भवन्ति। लीला, विलासो, विच्छित्तिर्विभ्रमः, किलकिञ्चितम्, मेट्टायितम्, कुट्टमितम्, विब्वोकः, ललितम्, विहृतञ्च दशभावाः स्वभावजा सन्ति।

एतेषां लक्षण-विषये भरतस्यानुसारणमेव धनञ्जयस्य साधारणपद्धतिः।

अभिनवगुप्तानुसारेणेषामलंकाराणां तावदेव महत्वं स्त्रीणां कृते भवति, यावद् ब्राह्मणां कृत उपनयनस्य भवति ।[2] अन्यच्च भरतानुसारेण।

[3]अलंकारस्तु नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः। ना० शा०22.4

अर्थादलंकाराणां सन्निवेशेन भावानां रसानाञ्च योऽतिशया समुत्पद्यते, तेन काव्यं रोचिष्णु जायते।

---

1. दश० 2.22
2. तत्पर ब्राह्मणरयोपनयनमिव भविष्यत्समस्तपुरुषार्थसद्मपीठबन्धत्वेन पोषिता परमो ह्युत्सवो लोकोत्तरोऽलकारा सातिशयमानन्द - स्थानं पर्वित्रमिव्युश्रूयते । ना० शा० 22.11 अधिकृत्य भारती।
3. ना० शा०22.4